# Agni Sūktam

[RV S 1-1-1 to 1-1-7 (Kāñchī Pāṭhaḥa)]

ॐ अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ॥ १ ॥

ॐ ag’nimīīḷē purōhi-tañ’
yaj’ñas’ya- dēvamṛt’vijam’m ।
hōtāāraṁ’ rat’nadhāta-mam ॥ 1 ॥

अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त । स दे॒वाँ , एह व॑क्षति ॥ २ ॥

ag’ni[fp]’ pūr’vēēbhir’ṛshi-bhirīḍ’yō nūta-nairuta ।
sa dēvām̐’ , ēha vak’ṣhati ॥ 2 ॥

अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वेदि॑वे । य॒शसं॑ वी॒रव॑त्तमम् ॥ ३ ॥

ag’ninaā rayimaśh’navat’pōṣha-mēva divēdi-vē ।
yaśhasaṁ’ṁ’ vīravat’tamam ॥ 3 ॥

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑ । स , इद्दे॒वेषु॑ गच्छति ॥ ४ ॥

ag’nē yañ’ yaj’ñamadh’varaṁ’
viśh’vata[fp]’ paribhūrasi- ।
sa , id’dēvēṣhu- gat’chhati ॥ 4 ॥

अ॒ग्निर्होता॑ क॒विक्र॑तुः स॒त्यश्चि॒त्रश्र॑वस्तमः । दे॒वो दे॒वेभि॒रा ग॑मत् ॥ ५ ॥

ag’nir’hōtaā kavik’ra-tus’
sat’yaśh’chit’raśh’ra-vas’tamaḥa ।
dēvō dēvēbhirā ga-mate ॥ 5 ॥

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥६॥

yadaṅ'ga dāśhuṣhēt' tvamag'nēē
bhad'raṅ' ka-riṣh'yasi- ।
tavēt'tat'sat'yamaṅ'ṅ'giraḥa ॥ 6 ॥

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त , एमसि ॥७॥

upat' tvāg'nē divēdi-vē dōṣhāāvas'tar'dhiyā vayam ।
namō bharan'n'ta , ēma-si ॥ 7 ॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥ ८ ॥

rājan'n'tamadh'varāṇāāṅ' gōpāmṛtas'ya dīdi-vim ।
var'dha-mānaṁ' svē damēē ॥ 8 ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ ९ ॥

sa na[fp]' pitēva- sūnavē (a)g'nēē sūpāyanō bha-va ।
sachas'vā nas' svas'tayēē ॥ 9 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.SaiVeda.net

## Agni Sūktam

[RV S 1-1-1 to 1-1-7 (Śhṛṅgērī Pāṭhaḥa)]

ॐ अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ॥१॥

ॐ ag’nimīīḷē purōhitañ’
yaj’ñas’ya dēvamṛt’vijam’m ।
hōtāāraṁ’ rat’nadhātamam ॥ 1 ॥

अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त । स दे॒वाँ , एह व॑क्षति ॥२॥

ag’ni[fp]’ pūr’vēēbhir’ṛṣhibhirīḍ’yō nūtanairuta ।
sa dēvāṁ̐’ , ēha vak’ṣhati ॥ 2 ॥

अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वेदि॑वे । य॒शसं॑ वी॒रव॑त्तमम् ॥३॥

ag’ninaā rayimaśh’navat’pōṣhamēva divēdivē ।
yaśhasaṁ’ṁ’ vīravat’tamam ॥ 3 ॥

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वत॑: परि॒भूरसि॑ । स , इद्दे॒वेषु॑ गच्छति ॥४॥

ag’nē yañ’ yaj’ñamadh’varaṁ’
viśh’vata[fp]’ paribhūrasi ।
sa , id’dēvēṣhu gat’chhati ॥ 4 ॥

अ॒ग्निर्होता॑ क॒विक्र॑तुः स॒त्यश्चि॒त्रश्र॑वस्तमः । दे॒वो दे॒वेभि॒रा ग॑मत् ॥५॥

ag’nir’hōtaā kavik’ratus’
sat’yaśh’chit’raśh’ravas’tamaḥa ।
dēvō dēvēbhirā gamate ॥ 5 ॥

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥६॥

yadaṅ’ga dāśhuṣhēt’ tvamag’nēē
bhad’raṅ’ kariṣh’yasi ।
tavēt’tat’sat’yamaṅ’ṅ’giraḥa ॥ 6 ॥

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त , एमसि ॥७॥

upat’ tvāg’nē divēdivē dōṣhāāvas’tar’dhiyā vayam ।
namō bharan’n’ta , ēmasi ॥ 7 ॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥ ८ ॥

rājan’n’tamadh’varāṇāāṅ’ gōpāmṛtas’ya dīdivim ।
var’dhamānaṁ’ svē damēē ॥ 8 ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ ९ ॥

sa na[fp]’ pitēva sūnavē (a)g’nēē sūpāyanō bhava ।
sachas’vā nas’ svas’tayēē ॥ 9 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVeda.net